# Shri Darubrahma Tandavam

# શ્રીદારુબ્રહ્મતાણ્ડવમ્

## Document Information

Text title : Darubrahma Tandavam

File name : dArubrahmatANDavam.itx

Category : vishhnu, vrajakishora

Location : doc_vishhnu

Author : Vrajakishora Tripathi June 25, 2020

Transliterated by : Vrajakishora Tripathi

Proofread by : Vrajakishora Tripathi

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 7, 2024

*sanskritdocuments.org*

# શ્રીદારુબ્રહ્મતાણ્ડવમ્

ધડદ્-ધડદ્-ધડદ્-ધડદ્-પહણ્ડિશબ્દમણ્ડિતં
ઘડર્-ઘડર્-ઘડર્-ઘડર્-રથીયનાદકમ્પિતમ્ ।
થથૈ-થથૈ-થથૈ-થથૈ-મૃદુઙ્ગલાસ્યશોભિતં
સ્મરન્ સ્મરન્ સ્મરન્ સ્મરન્ નમામિ દારુદૈવતમ્ ॥ ૧॥

સુનીલશૈલરાજિતં સુનીલચક્રભૂષિતં
સુનીલસાગરસ્થિતં સુપીતવસ્ત્રભાસિતમ્ ।
સુભદ્રભદ્રસંયુતં સુભદ્રિકાસમન્વિતં
સુવર્ણપીઠસંસ્થિતં નમામિ દારુદૈવતમ્ ॥ ૨॥

સુનિમ્બદારુવેરકં ધરાધરાભધારકં
મયૂરપિચ્છધારકં સુવર્ણહારધારકમ્ ।
સુવર્ત્તુલાક્ષિધારકં વિચિત્રચિત્રધારકં
રથપ્રમોદવર્દ્ધકં નમામિ દારુદૈવતમ્ ॥ ૩॥

સુતીક્ષ્ણચક્રનાયકં વિશાલશાર્ઙ્ગસાયકં
વિશિષ્ટશઙ્ખધારકં સુલીલપદ્મધારકમ્ ।
પ્રમત્તદૈત્યદારકં પ્રભૂતશાન્તિકારકં
અનલ્પપુણ્યદાયકં નમામિ દારુદૈવતમ્ ॥ ૪॥

ગજેશરાજપૂજિતં સુનન્દિઘોષવન્દિતં
સુરેન્દ્રનિત્યનન્દિતં વિનન્ધકીર્ત્તિરાજિતમ્ ।
રિપુપ્રતાપતાપકં સમગ્રલોકપાલકં
યમપ્રકોપતારકં નમામિ દારુદૈવતમ્ ॥ ૫॥

ખગેશ્વરં ગદેશ્વરં ભવેશ્વરં શિવેશ્વરં
મહીશ્વરં મહેશ્વરં સુદર્શનેશ્વરં વરમ્ ।
કલીશ્વરં કલેશ્વરં હલીશ્વરં સુરેશ્વરં
પુરેશ્વરં પુરીશ્વરં નમામિ દારુદૈવતમ્ ॥ ૬॥

રથેશ્વરં પથેશ્વરં નટેશ્વરં વટેશ્વરં
સુધીશ્વરં સદીશ્વરં હૃદીશ્વરં નદીશ્વરમ્ ।
મખેશ્વરં ક્ષમેશ્વરં જનેશ્વરં દયેશ્વરં
વિશિષ્ટકન્દરીશ્વરં નમામિ દારુદૈવતમ્ ॥ ૭॥

ગુણેશ્વરં ગુણીશ્વરં ગિરેશ્વરં ગિરીશ્વરં
મુનીશ્વરં શુભેશ્વરં દરિદ્રમાનુષેશ્વરમ્ ।
જવાધરં રમાધરં નગાધરં ધરાધરં
પરાત્પરં તમોહરં નમામિ દારુદૈવતમ્ ॥ ૮॥

પદામ્બુજં કરામ્બુજં દૃગમ્બુજં મુખામ્બુજં
વિભિન્નરૂપધારકં ગજેન્દ્રમુક્તિકારકમ્ ।
મહાપ્રસાદદાયકં સુભક્તિભુક્તિદાયકં
કરાલકાલનાશકં નમામિ દારુદૈવતમ્ ॥ ૯॥

પ્રશસ્તરમ્યમન્દિરં પ્રકૃષ્ટકૃષ્ણસુન્દરં
સુભક્તમોક્ષદાયકં સમગ્રવિશ્વનાયકમ્ ।
અખણ્ડભાગ્યકારકં પ્રચણ્ડપાપહારકં
પ્રમાદદાવદાહકં નમામિ દારુદૈવતમ્ ॥ ૧૦॥

સમસ્તનષ્ટશાસકં સમસ્તકષ્ટનાશકં
સમસ્તમન્દવારકં સમસ્તતાપતારકમ્ ।
સમસ્તદિવ્યકામદં સમસ્તભવ્યમાનદં
સમસ્તસૌખ્યદાયકં નમામિ દારુદૈવતમ્ ॥ ૧૧॥

સદા જગત્પતિસ્તુતિર્દદાતિ સૌખ્યસંહતિં
સ્મરન્ પઠન્ જપન્ જનઃ પ્રયાતિ પૂતપદ્ધતિમ્ ।
હૃદા મુદા દ્વિજવ્રજઃ પ્રણૌતિ તં મહાપ્રભું
દદાતુ શુદ્ધભાવનાં ધનં ધિયં સુખં શુભમ્ ॥ ૧૨॥

ઇતિ શ્રીવ્રજકિશોરત્રિપાઠીવિરચિતં શ્રીદારુબ્રહ્મતાણ્ડવં સમ્પૂર્ણમ્ ।

Dārubrahma (દારુબ્રહ્મ) refers to
Śrī Jagannāthadeva, transcendence within
wooden form.

Composed, encoded, and proofread by Vrajakishora

*Shri Darubrahma Tandavam*

pdf was typeset on July 7, 2024

Please send corrections to *sanskrit@cheerful.com*